सदा । एतत्कारणमुद्दिश्य नाम पर्य्युषितं१ मम । सूचिता बहवोऽनेन विप्राद्या ह्यन्नकाङ्क्षिणः । एतत्कारणमुद्दिश्य सूचीमुख२मिमं विदुः । शीघ्रं गच्छति विप्रेण याचितः क्षुधितेन वै । पश्चाद्भुङ्क्ते द्विजः शिष्टमेष शीघ्रक३ उच्यते । गृहोपरि सदा भुङ्क्ते स्वादु द्विजभयेन हि । द्विजाय कुत्सितं दत्त्वा एष रोहक४ उच्यते । मौनेनापि स्थितो नित्यं याचितो विलिखन्महीम् । अस्माकमपि पापिष्ठो लेखको५ नाम एष वै । मेढ्रेण लेखको याति रोहकः पार्श्वतःशिराः । शीघ्रकः पङ्गुतां प्राप्तः सूची सूचीमुखोऽभवत्”। प्रेताहारस्तत्रोक्तो यथा“द्विज उवाच “ये जीवा भुवि तिष्ठन्ति सर्व्वे आहारमूलकाः । युष्माकमपि चाहारं श्रोतुमिच्छामि तत्त्वतः” प्रेता ऊचुः “शृणु आहारमस्माकं सर्व्वसत्त्वविगर्हितम् । श्लेष्ममूत्रपुरीषेण योषितान्तु मलेन च । गृहाणि त्यक्तशौचानि प्रेता भुञ्जन्ति तत्र वै । स्त्रीभिर्जग्धानि जीर्णानि संकीर्णापहृतानि च । मलेनातिजुगुप्सानि प्रेता भुञ्जन्ति तत्र वै । भयलज्जाविहीनानि पतितैः सेवितानि च । अन्योन्यदस्युयुक्तानि प्रेता भुञ्जन्ति तत्र वै । कलहान्वितशोकानि त्यक्तशोभानि मण्डनैः । सवर्च्चस्कानि भाण्डानि प्रेता भुञ्जन्ति तत्र वै । बलिमन्त्रविहीनानि द्विजादृष्टानि यानि तु । नियमव्रतहीनानि प्रेता भुञ्जन्ति तत्र वै । गुरवो नैव पूज्यन्ते स्त्रीजितानि मलानि च । सक्रोधान्यपवित्राणि प्रेता भुञ्जन्ति तत्र वै । भुञ्जन्ति भिन्नभाण्डेषु मर्य्यादारहितेषु च । अन्योन्योच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुञ्जते । सकेशमाक्षिकोच्छिष्टं पूति पर्युषितं तथा । सक्रोधञ्च सशोकञ्च तच्च प्रेतेषु भोजनम् । अनग्नं भोजनं यच्च नोत्तरीयं पदासनम् । सोष्णीषं सासुरीकञ्च तच्च प्रेतेषु भोजनम् । अर्द्धग्रासं महाग्रासं सोत्क्षिप्तं पतितं तथा । दुर्भुक्तं गोष्ठिकञ्चैव तच्च प्रेतेषु भोजनम् । शौतिकं सूतकञ्चैव राजसं कलुषीकृतम् । निर्दीपं क्षमिवज्राग्रे यद्भुक्तं प्रैतिकन्तु तत् । एतत्ते कथितं सर्व्वं यत् प्रेतेष्वेव भोजनम् । निर्वाणाः प्रेतजात्या वै पृच्छामस्त्वां द्विजोत्तम” । प्रेतत्वाभावकारणं यथा “न प्रेतो जायते येन येन चैवेह जायते । एतत्सर्व्वं समासेन प्रब्रूहि वदतां वर !” ब्राह्मण उवाच “एकरात्रं त्रिरात्रं वा कृच्छ्रं चान्द्रायणादिकम् । व्रतेष्वभ्युषितो यस्तु न प्रेतो जायते नरः । मिष्टान्नपानदाताथ सततं श्रद्धयान्वितः । देवपूजापरो नित्यं न प्रेतो जायते नरः । त्रिरग्निरेकपञ्चाग्निर्निरग्निर्वाप्युपासकः । सर्व्वभूतदयापन्नो न प्रेतो जायते नरः । तुल्यमानापमानश्च तुल्यः काञ्चनलोष्टयोः । तुल्यः शत्रौ च मित्रे च न प्रेतो जायते नरः । देवतातिथिपूजासु गुरुजातिषु नित्यशः । वेदशास्त्ररतो नित्यं न प्रेतो जायते नरः । जितक्रोधो मदैश्वर्य्यतृष्णासङ्गविवर्जितः । क्षमाऽक्रोध सुशीलश्च न प्रेतो जायते नरः । देवतातिथिपूजास्तु पर्व्वतांश्च नदीस्तथा । पश्येद्देवालयांश्चैव न प्रेतो जायते नरः”। प्रेतत्वकारणं यथा “शूद्रान्नं यो द्विजो भुङ्क्ते यः क्रामति द्विजोत्तमम् । वृत्तिहा द्विजदेवेषु स प्रेतो जायते नरः । मातरं पितरं वृद्धं ज्ञातिं साधुजनं तथा । लोभात् त्यजति यः स्निग्धं स प्रेतो जायते नरः । अयाज्ययाजकश्चैव याज्यञ्च परिवर्जयेत् । शूद्रानुग्रहकर्त्ता च स प्रेतो जायते नरः । कुज्योतिषी कुविप्रस्तु कुजनेषु कुदेशकः । शूद्रसेवाकरो राज्ञां स प्रेतो जायते नरः । सेवनायापहृतो यः सेवकस्त्वपरिग्रहः । तावुभावपि जायेते प्रेतौ कालाच्च किंप्रदौ । द्विजानुमन्त्रितो भुङ्क्ते शूद्रान्नं वा द्विजस्य तु । शूद्रेणैव द्विजः प्रेतो निरयानुपगच्छति । गीतवाद्यरतो नित्यं मद्यपस्त्रीनिषेवणात् । वृथामांसप्रियो यस्तु स प्रेतो जायते नरः । वृथारेता वृथामांसो वृथावादो वृथामतिः । निन्दको द्विजदेवानां स प्रेतो जायते नरः । वृद्धं बालं गुरुं विप्रं योऽवमन्य भुनक्ति वै । कन्यां ददाति शुल्केन स प्रेतो जायते नरः । न्यासापहर्त्ता मित्रध्रुक् परपाकरतस्तथा । विश्वस्तघाती कूटश्च स प्रेतो जायते नरः । निर्दोषान् सुहृदो नारीस्त्यजेत् कालाच्च पाति यः । धनलोभेन यस्तेषां स प्रेतो जायते नरः । हस्त्यश्वरथयानानि छत्रशय्यासनादि यः । कृष्णाजिनञ्च गृह्णाति अनापत्सुगतो द्विजः । तथोभयमुखीं काले सशैलां मेदिनीं द्विजः । कुरुक्षेत्रस्य यद्दानं चाण्डालात् पतितात्तथा । माघिकेऽपि नवश्राद्धे भुञ्जन् प्रेतान्नभुङ्मतः । ब्रह्महा गोवधो स्तेयी सुरापो गुरुतल्पगः । भूमिकन्यापहर्त्ता यः स प्रेतो जायते नरः । नानासङ्करकृन्नित्यं वर्णसङ्करकृत्तथा । योनिसङ्करकृच्चापि स प्रेतो जायते नरः । विक्रीणाति विषं मद्यं तिलानां लवणस्य तु । गवां केशरिणां मोहात् विक्रयात् प्रेततां व्रजेत् । कूटमाप्येन तौल्येन क्रयं क्री-